National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(59): 255-257
© 2025 NJHSR
www.sanskritarticle.com

**वि.वि.के.एस्.कृष्णतेज**
शोधच्छात्र; अथर्ववेद भाष्यविभागः,
श्रीवेंङ्कटेश्वर वेद विश्वविद्यालय,
तिरुपति

**Correspondence:**
**वि.वि.के.एस्.कृष्णतेज**
शोधच्छात्र; अथर्ववेद भाष्यविभागः,
श्रीवेंङ्कटेश्वर वेद विश्वविद्यालय,
तिरुपति

# अथर्ववेदे सामाजिकश्रेयस्साधनानि

**वि.वि.के.एस्.कृष्णतेज**

मङ्गलाचरणम् -

**विश्ववन्द्यपदो वन्दे विबुधान् वेदविश्रुतान्।**
**पञ्च हेरम्ब-वैकुण्ठ-शक्ति-शङ्कर-भास्करान्।।**

**"ब्रह्म ब्रह्मणउज्जभार"[1],"चत्वारोवा इमे वेदा ऋग्वेदो यजुर्वेदस्सामवेदोब्रह्मवेदः"[2]** इति हिआथर्वणी श्रुतिः। परमात्मनो निश्वासभूताः ऋग्जुस्सामाथर्वेतीमे चत्वारो वेदाः भारतीय संस्कृतेः प्राणभूताः सन्ति। भारतीयः धर्मः, आध्यात्मिकता, आचारव्यवहाराः, रीतयः, नीतयः, विज्ञानं कलाचेति सर्वे विषयाः वेदाश्रिता एवेति समेषां विदितमेव। तत्र ऋगादि त्रयो वेदाःप्राधान्यतया आमुष्मिक फलदातारः सन्ति। परन्तु अथर्ववेदस्य विशिष्टमहत्वं वर्तते यत् अथर्ववेदः एहिकामुष्किकोभयविधफलप्रदः। मनुष्यस्यजीवनं सुखमन्वितं कर्तुं येषां साधनानाम् अपेक्षा भवति तेषां सिध्यर्थम् अथर्ववेदे विविधानामनुष्ठानानिउपदिष्टानि सन्ति।

न केवलंदेवतानां तत्वविचारः, न केवलं दार्शनिकविचारः अपितु समसमाज-निर्माणोपायाः, मानवसमाजस्य विधिकर्तव्यादीनि, आहारसपादनम्, ग्रामपट्टनादि परिरक्षणोपायाः विविधसम्पत्तिसिध्यु-पायाः, प्राणिषु ऐकमत्यसाधनमार्गाः, शत्रुजयोपायाः, रोगनिवारणोपायाः, सभाजयम, आयुर्वर्धनम्, मेधावर्धनम, कृषिकर्म, वाणिज्यम्, राजनीतिः, राज्यम्, राज्याङ्गम्, राजकीय-व्यवस्था एवं प्रकारेण मानवानां सर्वतोमुख-विकासाय नैकान् विषयान् मन्त्रमुखेन उद्बोधयति अयमथर्ववेदः।

अथ मानवसमाजस्य हिताय अथर्ववेदीय शौनकसंहितायांयानि कर्माणि उपदिष्टानि तद्विषये अत्रयत्किञ्चित् विभागशः स्थूलतया विचार्यते।

सामान्यतया मनुष्यैः अनुभूयमानानां शारीरिक-मानसिकादि सर्वेषामपि क्लेशानां निवारणमन्त्राः, मानवसमाजस्य श्रेयस्साधनाभ्युदयोपायाश्चअथर्वविदे बहुधा दरीदृश्यन्ते। एतत्सम्बधि अंशान् अथर्ववेदे भैषज्यकर्माणि, आयुष्यकर्माणि, पौष्टिकाणि, प्रायिश्चित्तानि, शान्तिकर्माणि, राजकर्माणि एवं प्रकारेण विभक्तुं शक्यते।

**भैषज्य-कर्माणि -**

तत्र व्याधयः द्विविधौ भवतः आहारनिमित्ता अन्यजन्मपापनिमिताश्चेति। आहारविमितानां वैद्यशास्त्रोक्तचिकित्सया उपशमनं, पापविमित्तानांतु आथर्वनैः होम – मार्जन-जलाभिषेचन-अभिमन्त्रण-मणिबन्धन-धूपन-पायनादिभिः भैषज्यकर्मभिः उपशमनं भवति । अथर्ववेदेनानाप्रकारेण सम्भावितानां श्वासकास-हृद्रोग-कुष्ठ-गण्डमाला- उन्माद-क्रिमिरोग-ज्वर-विषज्वर-यक्ष्म-राजयक्ष्मइत्यादीनां रोगानां चिकित्साः विहिताः। **"वरणो वारयाता.."[3]** , **"मुञ्चामित्वा हविषा.."[4]** इत्यादि सूक्तैः राजयक्ष्मणः (क्षय, Phthisis, TB)

**"यदग्निराप अदहत्....**"[5],**"जरायुजः प्रथमा.."**[6], **"अग्निस्तक्मानमप.."**[7], इत्यादि सूक्तैः ज्वर एवं विषज्वरानां चिकित्साः विहिताः।

**"पञ्चचयाः पञ्चाशच्च.."**[8] , **"या ओषधयः सोमराज्ञीः.."**[9] , **"अयं देवानामसुरो विराजति.."**[10], **"अप्सु ते राजन्.."**[11] इत्यादि सूक्तैः जलोदरव्याधेः (Ascites)चिकित्सा विहिता।

**"रोहण्यसि रोहणी.."**[12] इत्यनेन शल्यचिकित्सा विहिता।

एवं रूपेण अथर्ववेदे नानाविध चिकित्साप्रकाराणां, विविधौ-षधिवनस्पतीनां तद्विनियोगानाञ्च समग्रंमौलिकमध्यमनं वैपुल्येन लभ्यते। अपि चकतिपय रोगानामुत्पतिः रक्षोभूतपिशाचादिभिः कल्पितोपद्रवेणाऽपि भवितुमर्हति। तादृशानामप्युपद्रवानां शमनोपायः वेदेस्मिन् श्रूयते।

**आयुष्याकर्माणि**

दीर्घायुषे बहुविधाः प्रार्थनापरकमन्त्राः अस्मिन् विभागे सन्ति। एतेषां विशेषेण उपनयनविवाहादि संस्कारकर्मसु एतेषाम् आयुर्वर्धनन्त्राणां विनियोगः दृश्यते।

**"आयुर्दाअग्ने.."**[13], **"पार्थीवस्यरसे देवा..."**[14],**"नव प्राणान्नवभिः.."**[15] इत्यादि सूक्तैः संपूर्ण आयुष्यसिद्धये, बहुविध मृत्युभ्यः त्राणाय, विविध रोगेभ्यः रक्षणाय च प्रार्थनाः समुपलभ्यन्ते।

अथर्ववेदे आयुर्वर्धनाय रक्षासूत्रधारणस्यविशेष विधानमस्ति। अनेन रक्षासूत्र (मणि)धारणेन चिराजीवित्वं जायते।अपिच **"अंतकाय मृत्यावे.."**[16] इत्यनेन सूक्तेन मृतस्य पुनरुज्जीवनाय आयुष्कर्म विहितम्।

**पौष्टिकानि**

गृह-धन संपत्तये, पशुसंवर्धनाय, सीरकर्षणाय, बीजावपनाय, वीर-सन्तत्यै,

वाणिज्य-लाभाय, यशः-प्राप्तये, मेधावर्धनाय एवं प्रकारेण अथर्ववेदे मानव समाजस्य पुष्टि प्रापकानि विधिविधानानि प्रार्थनाश्च श्रूयन्ते।

**"समत्पतंतु प्रदिशो नभस्वतीः.."**[17] इति वृष्टि सूक्तस्य अनुष्ठानेन सकाले सुवृष्टिः सस्याभिवृद्धिश्च भवति।

**प्रायश्चित्तानि**

इहजन्मनि जन्मंतरे च आचरित अधर्मकार्याणि, पापाचरणानितद्धेतुना संभवित अशुभदोष, रोगरूप पापानं निवृत्तये प्रायश्चित्तकर्माणि देवताप्रार्थनाश्च विधीयन्ते।

**"अग्नेर्मन्वे प्रथमस्य....."**[18] इदत्यारभ्य सप्त सूक्तेषु पापनिवृत्तये अग्नीन्द्रादि देवता उद्दिश्य हृद्याः प्रार्थनाः श्रूयन्ते। तत्तद्देवतानुग्रहेण अपहतपाप्मा मनुष्यः सन्मार्गे चरितुं समर्थो भवति।

**शान्तिकर्माणि**

अथर्ववेदे भूकंप उल्कापातादि प्रकृति वैपरीत्येन संभावित सकलोपद्रव शमनार्थे, उत, कुटुंब कलहानां दंपत्योः वैशम्यादीनां उपशान्तये, ईर्ष्या निवृत्तये, शत्रुपीडा,कृत्यादि दुष्टशक्तीनां पीडोपशान्तये च शान्तिकर्माणि उक्तानि।

**"सत्यं बृहदृतमुदग्रं.."**[19] इति पृथ्वी सूक्तेन **"यस्ते पृथुस्तनयित्नुः.."**[20] इत्यादि सूक्तैः प्रकृति वैपरीत्यानां शान्तिः उक्ता।

**"सहृरदयं सांमनस्यं.."**[21] इति सूक्तेन दम्पत्योः परस्परवैषम्य-निवृत्तये शान्तिः विहिता।

**विंशे काण्डे "यस्ते हन्ति पतयन्तं.."**[22] इत्यादिभिः मन्त्रैः गर्भदोष-शान्तिः उक्ता।

षोडशकाण्डे दुस्स्वप्नदोषशान्तिः उक्ता।

न केवलं एतादृशाः अनिष्टपरिहाराः अपि च सामाजिकधर्माः, नीतयः, नियमाः, दंपत्योः धर्मः, कुटुंबव्यवस्था इत्यादयः सुष्ठु निरूपिताः मन्त्रेषु।

**अपि च "संजानीध्वं संपृच्यध्वं.."**[23] इत्यादि साम्मनस्य सूक्तेषु कथं वयं समग्रेण सुखेन संतोषेन जीवेम इदि वर्णितम्। अनेन पुनस्मारणं भवति यत्, समसमाजनिर्माणे प्रपञ्चदेशेषु भारतीयसंस्कृतेः प्रत्येकं स्थानं, भारतस्य उन्नतः मार्गः, अस्य मार्गदर्शकत्वं आदर्शत्वंच वेदेन एव सुस्थिरमभवत्, भवति, भविष्यति च इति।

**राजकर्माणि**

राज्ञां संबद्धानि बहूनि सूक्तानि अथर्ववेदे समुपलब्धानि सन्ति। एतेषां सूक्तानां अध्ययनेन पूर्वकालिक राजनैतिकस्थितित्याः विशदचित्रणं समुपलब्धं भवति।

अत एव अस्य क्षत्रवेदं इति नामांतरमपि विद्यते। अथर्वशौन-कसंहितायामस्यां राजकर्मानि बहूनि विहितानि।

**"अचिक्रदत् स्वपा.."**[24] इत्यनेन राज्ञः संबरणं, **"भूतो भूतेषु पय आदधाति.."**[25] इत्यनेन राज्याभिषेकः उक्तः। एवं राज्ञः पुरोहित-कर्माणिच बहूनि विहितनि।राजधर्माश्च तत्तन्मंत्रेषु अंतर्लीनतया बोध्यन्ते।

अन्यः पक्षश्च विद्यते संग्रामजयः इति। **"अग्निर्नश्शत्रून् प्रत्येतु विद्वान्.."**[26] इत्यादिभिः सूक्तैः संग्रामे शत्रुपराजयः प्रार्थितः तत्कर्म च विहितम्।अधुनातनकाले अपि एतदनुवर्तते। युद्धकाले यदि वैदिकैः एतानि सूक्तानि अनुष्ठीयन्ते, तर्हि तन्मन्त्रोक्तदेवतासाहाय्येन युद्धे सैन्यस्य रक्षणं भवति, शत्रुपराजयो भवति तथा देशसंरक्षणं भवति।

अत एव उक्तं अथर्वपरिशिष्टे

**यस्यराज्ञो जनपदे अथर्वाशान्तिपारगः।**

**निवसत्यपि तद्राष्ट्रं वर्धते निरुपद्रवम् ।।**[27] इति।।

**उपसंहरः**

एवं प्रकारेण मानवानां आधिव्याधिनिवारणारय, कल्याणमय-जीवनाय, मानव-समाजस्य योगक्षेमाय अभ्युदयाय च अयं अथर्ववेदः विराजते।

**सहायकग्रन्थसूची**

1. अथर्ववेद-संहिता (मूलमात्रम्) - चौखम्बा-संस्कृत-प्रतिष्ठान, दिल्ली - ११०००७.
2. अथर्ववेद-संहिता - (श्रीमत्सायणाचार्य-विरचित - माधवीयवेदार्थ-प्रकाशसहिता) चौखम्बा-कृष्णदास-अकादमी, वाराणसी २२१००१.
3. अथर्ववेद-संहितायाः ५, ८, ९, १०, १२, १३, १५, १६, १७, २० काण्डानि - (भाष्यकाराः श्रीमत्स्वामि-गङ्गेश्वरानन्दा उदासीनाः) सद्गुरु-गङ्गेश्वर-इण्टरनेशनल-वेदमिशन, तुलसी-निवास, बंबई २०. (सं. १९८५).

**पाद टिप्पणी:-**

[1]अथ.वे.शौ.सं.4.2.3

[2]गो.ब्रा,1.2.16

[3]अथ.वे.शौ.सं.का.6,सू.85

[4]अथ.वे.शौ.सं.का.3,सू.11

[5]अथ.वे.शौ.सं.का.1,सू.25

[6]अथ.वे.शौ.सं.का.1,सू.12

[7]अथ.वे.शौ.सं.का.5,सू.22

[8]अथ.वे.शौ.सं.का.6,सू.25

[9]अथ.वे.शौ.सं.का.6,सू.96

[10] अथ.वे.शौ.सं.का.1,सू.16

[11] अथ.वे.शौ.सं.का.7,सू.86

[12] अथ.वे.शौ.सं.का.4,सू.12

[13] अथ.वे.शौ.सं.का.2,सू.16

[14] अथ.वे.शौ.सं.का.2,सू.29

[15] अथ.वे.शौ.सं.का.5,सू.28

[16] अथ.वे.शौ.सं.का.8,सू.1

[17] अथ.वे.शौ.सं.का.4,सू.15

[18] अथ.वे.शौ.सं.का.4,सू.23

[19] अथ.वे.शौ.सं.का.12,सू.1

[20] अथ.वे.शौ.सं.का.7,सू.11

[21] अथ.वे.शौ.सं.का.3,सू.30

[22] अथ.वे.शौ.सं.का.20,सू.96,म.13-16

[23] अथ.वे.शौ.सं.का.6,सू.64

[24] अथ.वे.शौ.सं.का.3,सू.3

[25] अथ.वे.शौ.सं.का.4,सू.8

[26] अथ.वे.शौ.सं.का.7,सू.1

[27] अथर्व.परिशिष्टम्.69.7.1